This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ११ वर्गीक ज्योतिष

नांव - प्रातकालंकार

लेखक/लिपिकार .... पृष्ठ २१

काळ ... १ ... पूर्ण/अपूर्ण १२-१५ पृष्ठ गहाळ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ जातकालंकारः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशायनमः ॥ वस्वर्णब्रह्मविद्यापरिचयचतुरंश्रीशुकंव्यासपुत्रं नत्वाचार्यंमुनीनांहरिपदकमलेप्रे
मविश्रामभाजां ॥ स्विष्टेष्टंस्वेष्टदेवंश्रुतिसमधिगतंमाधवंभावयित्वा भावैरुद्भाव्यतेस्मैप्रवरमतिमुदेजातकालंकृ
तश्रीः ॥१॥ अथज्योतिर्विंत्तिलकः छंदोलंकृतिकाव्यरचनानिपुणः श्रीगणेशकविः श्रीशुकजातकानुरोधिजात
कालंकारनामकग्रंथंचिकीर्षुस्तदादौनिर्विघ्नपरिसमाप्त्यर्थंशिष्टाचारक्रमगतंभगवद्विभूतिभूतगुरुगणेशभारती

श्रीमंगलमूर्तयेनमः ॥ सानंदंप्रणिपत्यसिद्धिसदनंलंबोदरंभारतींसूर्यादिग्र
हमंडलंनिजगुरुंभक्त्याहृदब्जेस्थितं ॥ येषामंघ्रिसरोरुहस्मरणतोनानाविधाः
सिद्धयःसिद्धिंयांतिलघुप्रयांतिविलयंप्रत्यूहशैलव्रजाः ॥ १ ॥ ॥ छ ॥

कर्मप्रणिपातपरंवस्तुनिर्देशात्मकंमंगलमाचरतिद्वाभ्यांशार्दूलविक्रीडिताभ्यां सानंदमिति सद्भावाकलितमिति
च गणेशनाम्नाग्रंथकरणकुशलेनमयातज्जातकं वृत्तस्रग्धरयाप्रव्यक्तंक्रियेतस्पष्टार्थंयथास्यात्तथाविधीयतइत्य
र्थः किंकृत्वाभक्त्यातान्सिद्धिसदनंनत्वानमस्कृत्यतान् किंविधान्येषामंघ्रिसरोरुहस्मरणतः नानाविधाःअने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविधाः सिद्धयः कार्यसिद्धयः सिद्धिंपूर्णतायातिप्रत्यूहशैलव्रजाः विघ्नपर्वतसमूहाः विघ्नोंतरायः प्रत्यूहइत्यमरः व्रजोगोष्ठाध्ववृंदेषुइत्यमरः लघुशीघ्रंविलयंयांतिनश्यंति लघुक्षिप्रमरंद्रुतमित्यमरः लघ्वितिपदंशीघ्रतावाचकदेहलीदीपकन्यायेनोभयत्रान्वेतितान्कान्तदाह सिद्धिसदनं सिद्धिर्लक्ष्मीःतस्याःसदनंगृहंनिवासस्थानमितियावत् श्रीनिवासइत्यर्थः त्वंसिद्धिस्त्वंस्वधास्वाहेत्यादिलक्ष्मीस्तुत्यारंभेसिद्धिशब्दस्यलक्ष्म्यांप्रयुक्तत्वात् सिद्धिर्लक्ष्मीरितिनित्यविकल्पोर्थः कीदृशंसिद्धिसदनंसानंदंआनंदेनसहितं ब्रह्मणआनंदः आनंदंब्रह्मणोविद्वानितिश्रुतेः सानंदमितिविशेषणपदंभगवतोन्यत्रनोपपद्यते ततोन्यदत्तमितिश्रुत्वाब्रह्माणमित्यत्रार्त्तवोपदेशात् हृदब्जेस्थितंहृदयकमलवासिनं सर्वस्यचाहंहृदिसन्निविष्टइतिभगवद्वचनात् भक्त्याप्रीतिपूर्वकानुस्मृत्या गुरुंश्रीमच्छिवाख्यंलंबोदरंविनायकं भारतींसरस्वतीं सूर्यादिग्रहमंडलं रव्यादीनांग्रहाणांमंडलंसमूहंच प्रणिपत्यनमस्कृत्य शुकास्यगलितं शुकमुनिमुखात्भक्तिभूतंगलितं गाथोक्तिगाथानांश्लोकविधुराणांउक्तिर्व्यवहारःयस्मिन् तथाभूतं कथंव्यक्तंक्रियतेयथाशुकास्यात् गलितंश्रीमद्भागवतंमहापुराणंश्रीधरस्वामिनाव्यक्तंकृतमित्यध्याहारः कथंभूतंभागवतंजातकंच सद्भावाकलितंसन्प्रशस्तोभावोविष्णुभक्तिः तेनाकलितंविशिष्टंजातकपक्षेसद्भा

वैस्तन्वादिद्वादशभावैस्तात्पर्यैर्वाविशिष्टं पदार्थललितंपदार्थैःपरमभक्त्युद्युतकैः श्रवणकीर्तनादिभिःललितंरुचिरंजातकपक्षेपदार्थैः सानंदसदनादिभिर्मनोहरं योगांगलीलार्चितंयोगोभक्तियोगस्तस्यांगानि यमनियमप्राणायामप्रत्याहारध्यानधारणासमाधयः तेषांलीलाउपदेशविशेषास्ताभिरर्चितंमहितं जातकपक्षेयोगांगानि

सद्भावाकलितंपदार्थललितंयोगांगलीलार्चितंश्रीमद्भागवतंशुकास्यगलितंयच्छ्री
धरस्वामिना ॥ सुव्यक्तंक्रियतेगणेशकविनागाथोक्तितज्जातकंवृत्तस्रग्धरयाज
नादिसुफलंज्योतिर्विदांजीवनम् ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥

ग्रहभावादीनितेषांलीलायोग्यत्वेनघटनविशेषास्ताभिरर्चितंप्रशस्तमित्यर्थः ज्योतिर्विदांजीवनं ज्योतिः परमात्मानारायणःपरंज्योतिरितिश्रुतेः तद्विदांब्रह्मविदांजीवनंकालक्षेपयोग्यं जातकपक्षेज्योतिर्विदांगणकानांजीविकाप्रदत्वाज्जीवनमित्यर्थः वृत्तस्रग्धरयास्रग्धरावृत्तैरित्यर्थः जात्यभिप्रायेणैकवचनोक्तिः तस्यलक्षणं चत्वारोयत्रवर्णाःप्रथममित्यादि ॥ १ ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जा०लं० ॥ २ ॥

ननुश्रीधरस्वामिवद्भवतापिशुकजातकव्याख्यानकर्तव्येग्रंथारंभोनोचितस्तत्राह यत्पूर्वमिति गणेशनामाहंश्री मच्छिवानुज्ञयावेदशास्त्रसंपन्नशिवनाम्नः गुरोराज्ञयातत्प्रीत्यर्थमितिभावः पूर्वभावकालेशुकास्यगलितंछंदोर हितत्वात्फक्किकारूपंगूढतमंअतिशयेनगहनंनतुविशदं परमंसारार्थनिरूपणेनोत्कृष्टं यज्जातकं तदेवस्र ग्धरावृत्तैश्चारुरुचिरं विशदंकुर्वे फक्किकारूपस्यगूढतमस्यविशदीकरणंश्लोकैरेवोचितमित्याशयः कथंभूतोग

यत्पूर्वंपरमंशुकास्यगलितंसज्जातकंफक्किकारूपंगूढतमंतदेवविशदंकुर्वेगणेशो स्म्यहं ॥ दैवज्ञःसुतरांयशःसुखमतिःश्रीहर्षदंस्रग्धरावृत्तैश्चारुनृणांशुभायनप दंश्रीमच्छिवानुज्ञया ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥

णेशः दैवज्ञोऽदृष्टवेत्ता कर्तव्यग्रंथभावितवार्तादर्शीतिगूढभावःसुतरांयशः सुखमतिः अतिशयितकीर्तिजन्य सुखेमतिर्यस्यसः प्रयोजनगर्भमिदंविशेषणं यशोऽन्यमुखार्थमितिभावः कीदृशंतत् श्रीहर्षदंश्रियंहर्षंचददाति तत् शुभायनपदंशुभायनमांशुभजातकानां आनंदसिद्धिसदनादीनांपदंस्थानं ॥ ३ ॥

टी० ॥ २ ॥

ननुसत्कवीनांहर्षप्रदंत्वत्कृयंजातकंनस्यादित्याहभूयांसइतिभूमौयद्यपिकाव्यगुंफेगद्यरचनायांनिजमतिरचन शालिनः निजमत्याकावरचनातयाशालंतेतेभूयांसः निपुणाः संख्यावंतः कवयःसंति तथापिप्रचुरपरगुणानं दलीलांभजंतेप्रकृष्टपरगुणानुभवजन्यानंदलीलांउद्वहंति नोपेक्षंतइत्यर्थःपरगुणपरमाणून्पर्वतीकृत्यनित्यंनि जहृदिविकसंतःसंतिसंतःकियंतइत्युक्तत्वात्कृत्यानुपरगुणानुभवजन्यप्रमोदएवतेषांलीलेतिभावःउक्तमर्थम

भूयांसःसंतिभूमौनिजमतिरचनाशालिनःकाव्यगुंफेसंख्यावंतस्तथापिप्रचुरपर गुणानंदलीलांभजंते ॥ चंचद्गांभीर्यपद्माविबुधविटपिनांजन्मसंप्राप्तिभूतोमर्या दांनस्वकीयांत्यजतिकिलमहान्रत्नधामासरस्वान् ॥ ४ ॥ ॥ छ ॥

र्थांतरन्यासेनदृढपतिचंचद्गांभीर्यंचपद्माचविबुधविटपीचचंचद्गांभीर्यपद्माविबुधविटपिनः चंचंतोद्योतमानाः गांभीर्यादयश्चएतेषांजन्मसंप्राप्तिभूतः ॥ आश्रयोपिरत्नधामापिरत्नगृहमापिसरस्वान्समुद्रःस्वकीयांमर्यादां स्थितिंनत्यजति तथैवकवयोपिप्रमोदेरन्निितिभावः गांभीर्यंनिश्चलता पद्मालक्ष्मीःविबुधविटपीपारिजातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्ररत्नधामेतिपदंचिंत्यंधामशब्दस्यनपुंसकलिंगत्वात् अत्रतत्पुरुषसमासेपरवल्लिंगंद्वंद्वतत्पुरुषयोरित्यनुशासनेनरत्नधामेतिनपुंसकांतत्वस्यादंतत्वात् अतोरत्नधामाप्युदन्वानितिपाठःसमीचीनः ॥ ४ ॥ अथतन्वादीनांसामान्यविशेषंज्ञाःकथ्यंते यावदध्यायंआदौतावल्लग्नादीनांदेहादिसंज्ञाः तेषांसर्वेषांभावसंज्ञांचशार्दूलविक्रीडितेनाह देहंद्रव्यपराक्रमाविति लग्नतःल्यब्लोपेपंचमीलग्नमारभ्यक्रमेणदेहादयोद्वादशभावाः गदिताः

देहंद्रव्यपराक्रमौसुखसुतौशत्रुःकलत्रंमृतिर्भाग्यंराज्यपदंक्रमेणगदितालाभव्य
यौलग्नतः ॥ भावाद्वादशतत्रसौख्यशरणंदेहंमतंदेहिनांतस्माद्देवशुभाशुभाख्य
फलजःकार्योबुधैर्निर्णयः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥

उक्तास्तत्रलग्नंदेहोदेहभावः द्वीतीयतृतीयौद्रव्यपराक्रमौ द्रव्यपराक्रमभावौ चतुर्थपंचमौभावौसुखसुतौषष्ठःशत्रुः सप्तमभावः कलत्रं अष्टमोमृतिः नवमोभाग्यं दशमंराजपदं एकादशद्वादशौलाभव्ययौलाभव्ययनामकौ तत्रतेषुदेहिनांदेहःसौख्यंशरणंसुखाश्रयंमतंअतोबुधैःज्योतिर्विद्भिःस्वस्माद्देहादेवलग्नभावादेवशुभाशुभा

ख्यफलजोनिर्णयोवक्ष्यमाणप्रकारेणकार्यः ॥ ५ ॥ लग्नमिति लग्नंमूर्त्यादिशब्दवाच्यमितिमुनयःऊचुरितितृतीयेनान्वयः मुर्तिःअंगतनूःउदयवपुःकल्पमितिसमाहारः उदयःवपुःकल्पमाद्यंतन्वादयोलग्नपर्यायाः इति प्रथमभावः ततोनंतरंधनंस्वंकोशश्चार्थश्चकोशार्थौआख्यायस्यसतथातत्तथोक्तंधनंस्वादिसंज्ञमूचुरित्यन्वयः

लग्नंमूर्तिस्तथांगंतनुरुदयवपुःकल्पमाद्यंततःस्वंकोशार्थाख्यंकुटुंबंधनमथसहजं
भ्रातृदुश्चिक्यसंज्ञं ॥ अंबापातालतुर्यंहिबुकगृहसुहृद्वाहनंयानसंज्ञंबंध्वाख्यंचां
बुनीरंजलमथतनयंबुद्धिविद्यात्मजाख्यं ॥ ६ ॥ ॥ ॥ छ ॥

एवमग्रेपि सहजंभ्रातृदुश्चिक्यसंज्ञंतृतीयभावः अंबापातालतुर्यहिबुकगृहसुहृद्वाहनंयानसंज्ञंयाननामकं एवंबंध्वाख्यंबंधुसंज्ञं अंबुनीरंजलंएतेचतुर्थभावस्यपर्यायाइतिभावः अथतनयंबुद्धिविद्यात्मजाख्यंवाक्स्थानंपंचममित्यग्रिमेणसंबंधःस्यात्पंचमभावस्यैतेपर्यायाः ॥ ६ ॥ ॥ छ ॥ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्स्थानमिति अथषष्ठंरिपुद्वेषवैरिक्षताख्यंऊचुः रिपुद्वेषवैरिक्षतनामकमित्यर्थः अथसप्तमंजामित्रमस्तस्मर
मदद्यूनकामाभिधानंऊचुः सप्तमंजामित्रास्तस्मरमदनादिनामकमित्यर्थः अथाष्टमंरंध्रायुश्छिद्रनिधनलग्नपदं
मृत्युंअष्टमंरंध्रादिनामकमित्यूचुःअतोनवममिहशास्त्रेगुर्वाख्यं धर्मसंज्ञंशुभंतपोमार्गसंज्ञंऊचुः ॥ ७ ॥ ताते

वाक्स्थानंपंचमंस्यात्तनुजमथरिपुद्वेषवैरिक्षताख्यंषष्ठंजामित्रमस्तंस्मरमदनमदद्यू
नकामाभिधानम् ॥ रंध्रायुश्छिद्रयाम्यंनिधनलयपदंचाष्टमंमृत्युरन्यद्गुर्वाख्यंधर्मसंज्ञं
नवममिहशुभंस्यात्तपोमार्गसंज्ञं ॥७॥ ताताज्ञामानकर्मास्पदगगननभोव्योममेषूर
णाख्यंमध्यंव्यापारमूचुर्दशममथभवंचागमंप्राप्तिमायम् ॥ इत्थंप्रांत्यांतिमाख्यंमुन
यइहततोद्वादशंरिःफमाहुर्ग्राह्यंबुद्ध्वाप्रवीणैर्यदधिकममुतःसंज्ञयातस्यतच्च ॥ ८ ॥

ति अथतनोर्दशमंतातादिनामकमूचुरिति आज्ञामानंकर्मआस्पदंगगनंनभोव्योममेषूरणंमध्यमंव्यापारमूचुरिति
स्फुटाव्याक्तिः अथभवंएकादशं आगमंप्राप्तिं आयमूचुः इत्थमुक्तंततोद्वादशंप्रांत्यांतिमाख्यंप्रांत्यनामकंअंति

मंरिःफंचाहुःयदमुतःप्रोक्तात्पर्यायसमुदायात् अधिकंदृश्यते तस्यतस्ययन्नामोक्तंनामसंज्ञायांपर्यायंबुद्ध्वातत्तु
ल्यार्थंशुद्धंग्राह्यं यथा वित्तशब्देनतुल्योर्थेधनंसहोत्थेसहजभावोग्राह्यइति ॥ ८ ॥ आद्यमिति इहशास्त्रे
बुधैःआद्यंचतुर्थंसप्तमंदशमंकेंद्रमुक्तंपरतःकंटकाख्यंचतुष्टयंचस्यात् चतुष्टयमेवचातुष्टयंपंचमंनवमंत्रिकोणमु

आद्यंतुर्यंकलत्रंदशममिहबुधैः केंद्रमुक्तंत्रिकोणंपुत्रंधर्माख्यमुक्तंपणफरमुदितंमृत्यु
लाभात्मजार्थं ॥ धर्मंचापोक्लिमाख्यंव्ययरिपुसहजंकंटकाख्यंहिकेंद्रंचैतच्चातुष्टयं
स्यात्रिकमिहगदितंवैरिरिःफांतकाख्यं ॥ ९ ॥ चंद्रेज्यक्षितिजारवींदुतनयौगुर्विंदुसू
र्याःक्रमाच्छुक्रार्कौरविचंद्रभूमितनयाज्ञार्कासितज्ञौमताः ॥ अर्कादेःसुहृदःसमाअथ
बुधःसर्वेहिशुक्रार्कजौभौमाचार्ययमायमःकुजगुरूपूज्यःपरेवैरिणः ॥ १० ॥

क्तं मृत्युलाभात्मजार्थंअष्टममेकादशंपंचमंद्वितीयंपणफरमुक्तं नवमंद्वादशंषष्ठंसहजंआपोक्लमंसंज्ञउदितंवैरि
रिःफांतकाख्यंषष्ठद्वादशाष्टमंत्रिकमुक्तम् ॥ ९ ॥ अथमित्रशत्रूनेकेनशार्दूलविक्रीडितेनाहचंद्रेति चंद्रेज्यक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिजादयः अर्कादेःसुहृदः बुधादयः समाः अन्येवैरिणःमताः मुनिभिरितिशेषः सूर्यस्यचंद्रेज्यक्षितिजाः सुहृदः मित्राणि बुधःसमः रविबुधौचंद्रस्यमित्रेसर्वेअन्ये समाःगुर्विंदुसूर्याः भौमस्यमित्राणिशुक्रशनीसमौबुधः शत्रुः शुक्रसूर्यौबुधस्यमित्रेभौमगुरुशनयःसमाः चंद्रःशत्रुः रविचंद्रभौमाः गुरोर्मित्राणि शनिःसमः बुधशुक्रौशत्रू बुधशनीशुक्रस्यामित्रे कुजगुरूसमौ रविचंद्रौशत्रू सितज्ञौशनेर्मित्रेगुरुः समः रवींदुभौमाः शत्रवः

तृतीयदशमेग्रहोनवमपंचमेष्टांबुनीक्रमाच्चरणवृद्धितःस्मरगृहंततःपश्यति ॥ कुजः
सितबुधौशशीरविबुधौसितक्ष्मासुतौगुरुर्यमशनीगुरुर्भवनपाइमेमेषतः ॥ ११ ॥

॥ १० ॥ अथदृष्टीःपृथ्वीवृत्तेनाह तृतीयेति तृतीयदशमादिषु चरणवृद्धितः पश्यति तत्रतृतीयदशमेचरणदृष्ट्यापश्यति नवमपंचमेद्विचरणदृष्ट्यापश्यति अष्टांबुनी अष्टमचतुर्थेचरणत्रयदृष्ट्यापश्यति स्मरगृहंसप्तमं ततश्चरणदृष्ट्यापूर्णपश्यतीत्यर्थः तृतीयदशमेशनिःनवमपंचमेगुरुः चतुर्थाष्टमेभौमः पूर्णदृष्ट्यापश्यतीति जातकांतरेसविशेषोज्ञेयः इमेकुजादयोमेषतः मेषमारभ्यभवनपाः राशीशाः मेषस्यकुजः वृषस्यशुक्रः ॥ ५ ॥

मिथुनस्य बुधः कर्कस्यचंद्रः सिंहस्यरविरित्यादि ॥ ११ ॥ अध्यायंसमापयतिशालिन्याह हृद्येति श्रीगणेशेनविदुषाउतश्रीविशिष्टेन गणेशेनअलंकाराख्ये अलंकार नामके मंजुलेरुचिरेहृद्यैःपद्यैर्गुंफितेमनोहरैः श्लोकैःरचितेस्मिन्ग्रंथेवर्यैःश्रेष्ठैःदिग्भिःदशभिःवृत्तैःश्लोकैः अयंआदिमःप्रथमःसंज्ञाध्यायःप्रणीतः उक्तः रचि

हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ संज्ञाध्यायःश्रीगणेशेनवर्यैर्वृत्तैर्दिग्भिःसंयुतोयंप्रणीतः ॥ १२ ॥ इतिजातकालंकारेप्रथमोऽध्यायः ॥ १ ॥
शुकाननसरोरुहाद्गलितमत्रभूमीतलेफलंपरमसुंदरं सकलमाकलय्याधुना ॥ ब्रवीमितनुभाववतःप्रवरदैववित्तोषदंयदत्रममचापलंकिमपितत्क्षमध्वंबुधाः ॥ १ ॥

तइत्यर्थः ॥ १२ ॥ इतिश्रीगणेशदैवज्ञविरविरचितजात॰टीकायांहरभानुविर॰प्रथमोऽध्यायः ॥ १ ॥
अथभावाध्यायोव्याख्यायतेकविःस्वविनयंविशदयन् भावफलंवक्तुंपृथिवीवृत्तेनप्रतिजानीते शुकेति शुकान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसरोरुहाद्गलितं अहंतनुभावतःततःआरभ्यतत्फलंजातकफलं अधुनाब्रवीमि हेबुधाःपंडिताः अत्रवचने
ममयत्किमपि चापलंस्यात् तद्यूयंक्षमध्वंइतिप्रार्थना किंकृत्वाब्रवीमि अत्रभूमितलेशुकाननसरोरुहात्
शुकमुखारविंदाद्गलितंशिष्यप्रशिष्यद्वाराप्राप्तंपरमसुंदरंसकलंफलंआकलय्यविचार्यकथंभूतंफलंप्रवरदैववविदां
तोषदंउत्कृष्टज्योतिर्विदामानंददं अन्यत्रोक्तमन्यतोग्राह्यमितिन्यायेनप्रथमंग्रहभावस्पष्टतातेषांबलंचज्ञातव्यं
ततोभावसामान्यफलांतरंशुभपापमित्रग्रहदृष्टियोगादिकंभावषड्वर्गाः भावेशस्योदयास्तादिकंज्ञातव्यम् तदु
क्तंपृथुयशसा योयोभावः स्यामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः पापैरेवंतस्यभावस्य हानिर्निर्देष्ट
व्याप्रश्नतोजन्मतोवातत्रविशेषोगर्गजातके नीचस्थोरिपुगेहस्थोग्रहोभावविनाशकृत् ॥ उदासीनोग्रहोमध्ये
मित्रवर्क्षत्रिकोणगः ॥ स्वोच्चस्थश्चग्रहोप्येवंभाववृद्धिकरःस्मृतः ॥ व्ययाष्टमषष्ठभावेषु विपरीतफलमाहउश
नाचार्यः सौम्याःपुष्टिंपापाविपर्ययसंश्रितागृहाःकुर्युः ॥ मूर्त्यादिषुनिधनांत्यरिपुभावेव्युत्क्रमात्फलदाः ॥
अन्यच्चसौम्यवर्गाश्रिताभावाःशुभतांप्राप्नुवंतिहि ॥ पापवर्गाधिकानेष्टास्तन्वाद्यानात्रसंशयः ॥ लग्नलग्ना
धिपौस्यातांबलाधिकतरौयदि ॥ तत्फलानांप्रवृद्धिःस्याद्धीनोहानिकरःस्मृतः ॥ एवंभावेषुसर्वेषुभावभावेशयो

बलात् ॥ ततोजनुषिवक्तव्याहानिर्वृद्धिश्चकोविदैरिति सर्वार्थचिंतामणौ लग्नादिभावाद्रिपुरंध्ररिःफेपापग्रहास्त
द्भवनादिनशःसौम्यास्तुतेषूक्तफलप्रदाःस्युस्तन्वादिकानांफलमेवमाहुः ॥ १ ॥ यद्भावनाथोरिपुरंध्ररिःफेदुः
स्थानपोयद्भवनस्थितोवा ॥ तद्भावनाशंकथयंतितज्ज्ञाःशुभेक्षितेतद्भवनस्यसौख्यं ॥ २ ॥ तत्तद्भावेत्रिकोणे

देहाधीशःसपापोव्ययरिपुमृतिगश्चेत्तदादेहसौख्यंनस्याज्जंतोर्निजर्क्षेव्ययरिपुमृ
तिपस्तत्फलस्यैवकर्ता ॥ मूर्तौचेत्क्रूरखेटस्तदनुतनुपतिस्वीयवीर्येणहीनंनानातं
काकुलःस्वाद्व्रजतिहिमनुजोव्याधिमाधिप्रकोपं ॥ २ ॥ ॥ ७ ॥

वसुखमदनभेचास्पदेसौम्ययुक्ते पापानांदृष्टिहीनेभवनपसहितेपापखेटैरयुक्ते ॥ भावानांपुष्टिमाहुस्त्वथचशु
भकरीमन्यथात्वेप्रणाशंमिश्रंमिश्रैर्गुहेंद्रैःसकलमपितथामूर्तिभावादिकानामिति ॥ १ ॥ अथत्रिभिःश्लोकैस्तनु
भावविशेषमाह देहाधीशेति देहाधीशः लग्नस्वामी सपापःपापग्रहेणयुक्तःव्ययारिपुमृतिगः द्वादशषष्ठाष्टमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यतमस्थानगतश्चेत्तदाजातस्यदेहसौख्यंनस्यात् अस्ययोगस्यधनादिभावेविचार्यत्वद्योतनायप्रथममुक्तिरि
तिगम्यते यद्भावनाथोरिपुरंध्रारिःफेतद्भावनाशंकथयंतितज्ज्ञाः ॥ इतिप्राक्लिखितत्वात् ॥ अन्यदाह व्यये
शोव्यये षष्ठेशः षष्ठे अष्टमाधीशोष्टमेचतत्फलस्यैवकर्त्तादेहसौख्याभावकर्तास्यात् अयमर्थोयवनमतेनविरुद्धो
यथाबृहज्जातके रिपुभवनपेरिपुस्थेनीरुग्वैरीसुखीकृपणः ॥ निधनपतौनिधनस्थेव्यवसायीव्याधिवर्जितोप्युदि
तः ॥ विरोधशमनायअयमर्थोबोध्यःदेहाधीशेव्ययरिपुमृतिगेसतितद्भवनपेपितत्रस्थेशुभफलंस्यादितिनवाच्यं
पूर्वोक्तयोगेसतिव्ययरिपुमृतिपः स्वभवनगतश्चेत्तत्फलस्यैवकर्तेतिवाच्यं योगानामचिंत्यफलत्त्वादिति अथा
न्ययोगमाह मूर्त्ताविति मूर्तौलग्नेतनुपतिःक्रूरग्रहःक्रूरखेटःलग्नेशःस्वीयवीर्येणहीनः स्वकीयबलहीनश्चेत्तदाजा
तोमनुजः नानातंकाकुलः अनेकरोगाकुलःव्याधिंरोगंआधिंप्रकोपंचिंताव्याप्तत्वंव्रजति प्राप्नोतिबलत्वंपरपुं
ग्रहंनीचास्तन्वादिभिर्ज्ञेयं तदुक्तंजातकामृते स्वोच्चंमूलत्रिकोणंस्वगृहमधिसुहृद्गेहकंमित्रकंस्यादौदासीन्यंस
मर्क्षं रिपुभमधिरिपोर्भंचनीचाभिधानं । पूर्वेपूर्वेबलीयःपरमपरमिदंहीनसत्वंतदस्मादित्यादिवत्पद्धतिप्रकारमते
नउत्तमबलत्वंचज्ञेयं अल्पेबलेहीनबलइतिपद्धतिवचनात् ॥ २ ॥ ॥ छ ॥ ॥ छ ॥

अथशुभयोगानाह अंगाधीशःलग्नेचेदित्येकोयोगःबुधगुरुकविभिर्युक्तोलग्नेशः केंद्रगइतिद्वितीयःस्वीये तुं
गेस्वोच्चेअजवृषभमृगांगनाकुलीराझषवणिजौचदिवाकरादितुंगाइत्याद्युक्तेः स्वमित्रेस्वमित्रगृहे अथवाशुभ
भवनेशुभगृहे शुभग्रहःवीक्षितःलग्नेशइतितृतीयःएषामन्यतमयोगेजातोमानवः मानवानांमध्येभूपादिकः
स्यात् भूपःभूपालः मंत्री अमात्यसर्वसंपन्निधानं सर्वसंपदामाश्रयः ज्ञानीभूपत्वाद्युपयुक्तज्ञानवान् सत्वरू

अंगाधीशःस्वगेहेबुधगुरुकविभिःसंयुतःकेंद्रगोवास्वीयेतुंगेस्वमित्रेयदिशुभभव
नेवीक्षितःसत्वरूपः॥ स्यान्नूनंपुण्यशीलःसकलजनमतःसर्वसंपन्निधानम् ज्ञानी
मंत्रीचभूपःसुरुचिरनयनोमानवोमानवानाम् ॥ ३ ॥ ॥ छ ॥

पःसत्वगुणानुरूपःअतश्चपुण्यशीलःसुकृतीसुरुचिरनयनः सुंदरनयनादिशरीरः सकलजनमतः सर्वजनमा
न्यः पुण्यशीलशब्देनसत्यार्जवादिद्योत्यतेतदुक्तंजातकरहस्ये: सात्विकस्तस्यदयास्थिरत्वंसत्यार्जवब्राह्मण
देवभक्तिरिति ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथानिष्टयोगत्रयंश्लोकेनाह क्रूरेलग्नेक्रूरग्रहराशौलग्नेशःस्थितः अयंएकोयोगःपुष्पवंतौरवींदूक्रूरयोर्ग्रहयोर्म
ध्यस्थौक्रूरमध्यस्थौ क्रूरमध्यस्थत्वंराश्यंशापेक्षयावाज्ञेयम् संकोचेप्रमाणाभावात् अयंद्वितीयोयोगः अथदि
नपनिशानाथयोः सूर्याचंद्रमसोः द्यूनयायीसप्तमगः भौमः बुधः पृष्ठादुदयंअधिगतः पृष्ठोदयराशौस्थितइति
तृतीयोयोगः अत्रजातः पुरुषः मनस्वीप्रशस्तमनाइत्यर्थः अंधः दुष्टकर्मा परभवनरतः परगृहवासरतः परस्त्री

लग्नेक्रूरेथयातेखलखचरगृहंलग्ननाथेरवींदूरांक्रूतस्थानसंस्थावथदिनपनिशाना
थयोर्द्यूनयायी ॥ भुमीपुत्रस्तुपृष्टादुदयमधिगतश्चंद्रजश्चेन्मनस्वीस्यादंधोदुष्ट
कर्मापरभवनरतःपूरुषःक्षीणकायः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥

रतोवास्यात् क्षीणकायः क्षीणशरीरश्च मनस्वित्वंकालगतचंद्रस्यबलत्वेबोध्यम् एवंतनुभावस्यशुभाशुभयो
गाउक्ताः ननुक्वचिच्छुभयोगेपिशुभफलंनोपलभ्यते तथा अशुभयोगेऽशुभफलमिति तत्रकोविशेषइतिचेत्स
त्यं क्रूरग्रहदृष्टयुतत्वादियोगेनअयंभावः शुभयोगकारकग्रहोपरिक्रूरदृष्टौसत्यांविनिश्चयप्राप्तंफलंनोपलभ्यते ॥ ८ ॥

अशुभयोगकर्तरिग्रहोपरिशुभदृष्ट्याऽ [illegible] लभ्यते ताजिककारैरित्थशालस्यदृष्टिप्रयुतमणऊंयोगेन भजं
तंकृतमुक्तंबृहज्जातककारेणनशुभाशु [illegible] यथाभवंतिशुभेक्षिताइत्युक्तम् इतितनुभावः ॥ ४ ॥ अथ
धनभावफलं श्लोकद्वयेनब्रुवन् प्रथ [illegible] द्वयमाह कोशाधीशइति कोशाधीशोधनेशः गुरुयुतः स्व
राशौस्वेभावेकेंद्रेवाचेत्तदाजातस्यस [illegible] मात् अथानंतरमन्ययोगउच्यते इत्यर्थः गुरुयुतोधनाधीशः

कोशाधीशःस्वराशौसु [illegible] तःसर्वसंपत्प्रदःस्यात्केंद्रेवाथत्रिकेचेद्भवतिहिम
नुजःक्लेशभाग्द्रव्यहीनः ॥ स्वांत्याधीशौत्रिकस्थौकवितनुपयुतौस्यात्तदानेत्रही
नश्चंद्रःपापेनयुक्तोधनभवनगतःशुक्रयुङ्नेत्रहीनः ॥ ५ ॥ ॥ छ ॥

त्रिकेषुषष्ठाष्टमद्वादशेषुअन्यतमेचेज्जातोमनुजः क्लेशभाक्द्रव्यहीनश्चस्यात् सगुरुःधनाधीशः षष्ठेचेदयंयोगः
शिथिलोज्ञेयःतंप्रतिचाल्पधनयोगसद्भावात् धनाधीशस्यशुभत्वेमध्यधनयोगसद्भावात् तदुक्तंबृहज्जातकेलग्ना
दतीववसुमान्शशांकात्सौम्यग्रहैरुपचयगतैःसमेतैः ॥ द्वाभ्यांसमोल्पपशुमांश्चतदूनतायामन्येषुसत्स्वपिफलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्विदमुत्कटेन ॥ अथान्ययोगः स्वांत्याधीशौद्वितीयद्वादशाधीशौशुक्रलग्नेशयुक्तौचेत्तदाजातः नेत्रहीनःअंधः
स्यात्अथान्ययोगःशुक्रपापाभ्यांयुक्तश्चंद्रोधनस्थश्चेत्तदाजातोनेत्रहीनइति ॥ ५ ॥ अन्ययोगत्रयंतत्रद्वितीययो
गस्यताताादिष्वतिदेशंचाह जनुषिजन्मसमयेसेंदुःसचंद्रः शुक्रस्त्रिकस्थः षष्ठाष्टमद्वादशेषु अन्यतमेचेत्तदाजातो
मनुजः निशिअंधकत्वंप्राप्नुयात् सार्कशुक्रःसूर्यशुक्रयुतःतनुभवनपतिः लग्नेशःत्रिकस्थइत्यनुषंगः तदानींजा

शुक्रःसेंदुस्त्रिकस्थोजनुषिनिशिनरःप्राप्नुयादंधकत्वंजन्मांधःसार्कशुक्रस्तनुभव
नपतिःस्यात्तदानींमनुष्यः [illegible] ॥ एवंतातानुजांबासुतनिजगृहिणीस्थाननाथाः
स्थिताश्चेदादेश्यंतत्रतेषां [illegible] तियुतैरंधकत्वंतदानीं ॥ ६ ॥

तोमनुज :जन्मांधः जन्मनैवांधःस्या [illegible] नां स्थाननाथाः एवंपूर्वोक्तप्रकारेण सार्केंदुशुक्रास्त्रिकस्थाश्चे
त्तदानीं तेषांतातादीनांअंधकत्वंप्रव [illegible] श्यंवक्तव्यम् तत्रतातःपिता अनुजः कनिष्ठभ्राता अंबामाता
निजगृहिणीभार्या प्रवरमतिशब्देन त [illegible] जन्मन्यपि अंधयोगज्ञानत्वंसूच्यते इतिधनभावः ॥ ६ ॥

अथभ्रातृसंभवतत्सुखादियोगानाह भ्रातृस्थानेशभौमौ तृतीयाधिपतिभौमौ व्ययरिपुनिधनस्थानगौ १२।६।८
त्रिकस्थौयदितदाजातः बंधुहीनः सामान्यशब्दनिर्देशेनसहोदरबंधवोविवक्षितास्तैरहितइत्यर्थः सहजभवनपे
सहजाधिपे स्वक्षेत्रेस्वगृहे सौम्यदृष्टेशुभग्रहदृष्टे सतिमानवःतद्वान्बंधुमान्स्यात् सहजाधिपेशुभग्रहयुतेकेंद्र
स्थे अदभ्रंबहुबंधुसौख्यंस्यात् केंद्रस्थेसहजभवनपेपापग्रहैर्युतेचेदन्यथा बंधुसौख्यंनस्यात् युतेदृष्टेइत्युपल

भ्रातृस्थानेशभौमौव्ययरिपुनिधनस्थानगौबंधुहीनःस्वक्षेत्रेसौम्यदृष्टेसहजभव
नपेमानवःस्याच्चतद्वान् ॥ केंद्रस्थेबंधुसौख्यंशुभविहगयुतेस्याददभ्रंनराणांपा
पैश्चेदन्यथैतत्तदनुनिजधियाज्ञेयमित्थंसमस्तं ॥ ७ ॥ ॥ ॥ छ ॥

क्षणम् इत्थंअमुनाप्रकारेण बुद्धिमद्भिर्निजधियास्वबुत्ध्यासमस्तंभावफलं तदनुयोगविचारानंतरंज्ञेयम् अय
मर्थः योगेसत्यपियोगकर्तृषुभूयसीपापदृष्टिः पापयोगः योगकर्तृणांनीचास्ततोयोगेप्रागुक्तंलक्षणंनस्यात् इ
तितृतीयोभावः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथचतुर्थभावफलंवदन्योगचतुष्टयमाह पातालेशश्चतुर्थेशः स्वराशौशुभखचरयुतः शुभग्रहयुक्तःसन् भाग्य
पेनभाग्यस्वामिनायुक्तश्चेज्जातः सामंतःस्यात् मांडलिकःस्यात्ततोयोगानंतरंलग्नस्थः वाहनेशोगुरुणापूर्णदृ
ष्ट्यादृष्टश्चेत्तदाजातः राजपूज्यः राजकृतसन्मानभाजनंस्यात् तदनुगुरुदृष्टः सुखेशः लाभगश्चेत् यद्वा गुरु

पातालेशःस्वराशौशुभखचरयुतोभाग्यनाथेनयुक्तःसामंतःस्यात्ततश्चेत्सुरपतिगु
रुणावाहनेशस्तनुस्थः ॥ संदृष्टोराजपूज्यस्तदनुचहिबुकाधीश्वरोलाभसंस्थोया
नंपश्यन्नराणांनिवहमभिमतंवाहनानांप्रदत्ते ॥ ८ ॥ ॥ ॥ छ ॥

दृष्टः सुखेशः यानंपश्यन्भवति तदा वाहनानांनिवहंसमूहंनराणांअभिमतप्रदत्ते इदंयोगद्वयंवाशब्दप्रयोज
केपिज्ञेयम्अन्ययोगलाभाच्चतुर्थदृष्टिविरहात् योगप्रभावप्रसंगात् ॥ ८ ॥ ॥ छ ॥ ॥ छ ॥

अथगृहप्राप्त्यादियोगानाह लग्नेशसहितश्चतुर्थभावनाथः स्वक्षेत्रेचतुर्थभवनेचेत्तदाजातस्यअकस्मादयत्नतोगृ
हाप्तिःगृहलाभःस्यात्तथासुहृद्भिर्हितकारकैर्जनैःसौहार्दप्रीतिः सुहृज्जनयुक्तंगृहादिस्यादित्यर्थः तनुपतियुक्तः
चतुर्थनाथःतदितरगृहगःचतुर्थभवनादन्यभवनस्थश्चेत्तदागृहालभ्ययोगःगृहप्राप्त्यभावःयावंतःक्रूरग्रहाःद्वि

स्वक्षेत्रेतुर्यनाथस्तनुपतिसहितःस्यादकस्माद्गृहाप्तिः सौहार्दंवासुहृद्भिस्तादितर
गृहगश्चेद्गृहालभ्ययोगः ॥ यावंतःपापखेटाधनशमगृहप्रांत्यपैश्चेत्त्रिकस्थायु
क्तास्तावत्प्रमाणाज्वलनवशगताःक्लेशदाःस्युर्गृहानुः ॥ ९ ॥ ॥ छ ॥

तीयदशमचतुर्थद्वादशनाथैःसहिताःत्रिकस्थाःतावंतोगृहाःजातस्यनुःनरस्यवन्हिवशगतादग्धाःअतएवक्लेश
दाःस्युःअत्रधनेशादीनांचतुर्णांसमुदितानामेकयोगोनविवक्षितःत्रिकभवनेयोवाप्रांत्यसद्भावेसावकाशत्वात् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवाहनविरामयोगौतच्छांतिकरणंचाह क्रूराइत्यनुषंगःयावंतः वाहनस्थाः शुभविहगदृशांगोचरानोभवेयुः
शुभग्रहदृष्टानस्युःतावंतःनृणांपरमगुणवतांप्रकृष्टगुणयुक्तानांवाहनानांविरामाः विनाशाः स्युः अथद्वादशाष्टम

यावंतोवाहनस्थाःशुभविहगदृशांगोचरानोभवेयुस्तावंतोवाविरामाः परमगुण
वतांवाहनानांन्नृणांस्युः ॥ क्रूराःपश्यंतियानंव्ययनिधनगताश्चेत्तदातद्वदेवप्राज्ञै
रादेश्यमेषांखलुशुभकरणंशांतिकंवाहनानां ॥ १० ॥ विद्यास्थानाधिपोवाबुध
गुरुसहितश्चेत्त्रिकेवर्तमानोविद्याहीनोनरः स्यादथनवमनिजक्षेत्रकेंद्रेषुतद्वान् ॥
बालत्वंवृद्धतावायदिगगनसदांजन्मकालेतदास्यात्प्रज्ञामांद्यंनराणामथयदिवि
हगः स्वर्क्षगोदोषहृत्स्यात् ॥ ११ ॥ ॥ ६ ॥ ॥ ६ ॥

गताःक्रूराःयावंतइत्यनुषंगश्चतुर्थंपश्यंतिचेत्तदापंडितैस्तद्वदेवदष्टक्रूरग्रहे संख्याप्रायेस्ववाहनानांविरामाःस्युरि ॥ ११ ॥
त्यर्थःतत्रवाहनानांशुभकरणंशांतिकंप्राज्ञैः आदेश्यंविधेयमिति शेषःइतिचतुर्थभावः ॥ १० ॥ अथपंचमभावफलं

निरुपायेनविद्याबुद्धियोगानाह विद्यास्थानाधिपः पंचमेशः केवलोवाबुधगुरुसहितोवात्रिकेवर्तमानश्चेत्तदा
जातोविद्याहीनः त्रिकस्थेपंचमेशे बुधगुरुयोगेविद्याद्यनुकूलोनास्तीतिवाशब्देनद्योतितं अथपंचमेशःपंचम
नवम केंद्रेषुस्थितश्चेत्तदाजातः विद्यावान् बुधगुरुयोगेविद्यावत्त्वंकिमुतवक्तव्यमितिगम्यतेअथजन्मकालेप्र
ज्ञायोगकर्तॄणांगगनसदांग्रहाणांबालत्वंवृद्धतावायदितदाजातानांप्रज्ञामांद्यंअल्पबुद्धिःस्यात् यदिबालोवृद्धोवा

वाक्स्थानेशोगुरुर्वाव्ययरिपुविलयस्थानगोवाग्विहीनश्चैवंपित्रादिकानांपतयइ
हयुतामूकतास्याच्चताभ्यां ॥ वागीशात्पंचमेशस्त्रिकभवनगतःपुत्रधर्मांगनाथा
रंध्रेद्वेष्यांतिमस्थायदिजनुषिनृणामात्मजानामभावः ॥ १२ ॥ ॥ ६ ॥

ग्रहः स्वक्षेत्रगः तदादोषहृत् प्रज्ञामांद्यत्वप्रयोजकदोषंदूरीकुर्यादित्यर्थः ॥ ११ ॥ अथमूकत्वसंतानाभावयो
गानाह वाक्स्थानेशः पंचमेशोगुरुर्वाव्ययरिपुविलयस्थानगस्त्रिकस्थश्चेत्तदावाग्विहीनः मूकः स्यात् अथपि
त्रादिमूकतायोगमाह एवंप्रकारेणपित्रादिभावानांदशमभवादिराशीनांपतयस्ताभ्यांपंचमेशगुरुयुताः त्रिकेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शंतिचेत्तदातातादीनांमूकत्वंस्यात् आदिशब्दात् अनुजादयोज्ञेयाःअथजन्मनिजीवात् जीवाधिष्ठितराशेः
पंचमेशःत्रिकस्थःपुत्रधर्मांगनाथाः पंचमनवमलग्नेशाः जन्मलग्नात्त्रिकस्थाः यदितदापुत्राणामभावोवाच्यः
॥ १२ ॥ अथसंतानयोगमाह तेपुत्रधर्मांगनाथाःशुभखगसहिताश्चेत्तदासंतानोत्पत्तौकिंचित्कालंविलंबः
स्यात् शुभग्रहदशांतर्दशाबलापेक्षयाविलंबइतिभावःअथकर्कराशौपंचमभावेचंद्रश्चेत्तदाकन्याप्रजावान् अथ

किंचित्कालंविलंबः शुभखगसहितास्तेथकर्केसुतर्क्षेचंद्रेकन्याप्रजावान्प्रमितत
नयवांश्चाथदेवेंद्रपूज्यात् ॥ क्रूरश्चेत्पंचमस्थः सुतभवनगतः स्यात्तदापत्यही
नश्छायापुत्रस्वगेहाद्यदिभवतिसुतेसूनुरेकस्तदानीं ॥ १३ ॥ ॥ ७ ॥

वाप्रमिततनयवान्स्वल्पापत्यःस्यात् अथदेवेंद्रपूज्यात्जीवात्पंचमस्थः क्रूरश्चेत् जीवोपिलग्नात्पंचमगस्तदा
पत्यहीनः संतानरहितःस्यात्यदिस्वगेहात्स्वराशितःपंचमेछायापुत्रःशनिश्चेत्तदाएकपुत्रःस्यात् अत्रसंपूर्णदृ
ष्ट्याशुभकृतस्यशनेःस्वराशेः पुत्रभवनेदृष्ट्यानेकपुत्रयोगस्तदारविभौमयोः स्वगृहात्पंचमस्थयोरेकपुत्रत्वं ॥ १२ ॥

अष्टमेशोनवमेभावेलग्नेशेक्रूरदृष्टेअष्टमगतेअब्धिहस्ताश्चतुर्विंशतिरायुःस्यात् लग्नाष्टमेशौअष्टमस्थौयदितदा
सप्तविंशतिवर्षाण्यायुः क्रूरसंयुतः गुरुः चंद्रदृष्टोलग्नेयदि अन्यः कश्चिद्ग्रहः अष्टमस्थः तदाद्विपक्षाद्द्वाविं
शतिरायुःस्यात् ॥ ५ ॥ लग्नचंद्रौक्रूरग्रहयोगरहितौलग्नेगुरौअष्टमंग्रहरहितंकेंद्रेशुभग्रहेयदितदाखशैलाः

कीटेलग्नेसुरेज्येयदिभवतितदाखाष्टतुल्यंलयेशोधर्मेगेचांगनाथेनिधनभवनगेक्रू
रदृष्टेब्धिहस्ताः ॥ लग्नाधीशाष्टनाथौलयभवनगतौसप्तविंशद्विलग्नेक्रूरेज्यौचंद्र
दृष्टौयदिनिधनगतःकश्चनास्तेद्विपक्षाः॥५॥लग्नेंदूक्रूरहीनौवपुषिसुरगुरौरंध्रभंखे
टहीनंकेंद्रेसौम्येखशैलाःसितविबुधगुरूस्याच्छतंकेंद्रगौचेत् ॥वागीशेकर्कलग्नेश
तमिहभृगुजेकेंद्रगेथार्कसूनौधर्मांगस्थेसुधांशौव्ययनवमगतेहायनानांशतंस्यात्॥६

सप्ततिः शुक्रबृहस्पतीकेंद्रगौचेत् शतंवर्षाणि गुरौकर्कलग्नेभृगुजेकेंद्रगेचशतंवर्षाणि एतेविशिष्टयोगाइत्यर्थःयो
स्यवैशिष्ट्यं यशःसंपत्सूचकमितिभावः अथशनौनवमगेलग्नस्थेवाचंद्रेव्ययनवमगतेवर्षाणांशतमायुःस्यात्॥६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रूरग्रहाःपंचमकेंद्राष्टमनवमस्थाः नोभवेयुः धनुर्मीनेलग्नेकेंद्रेशुक्रेगुरौवानवमाष्टमंच शुभग्रहावलोकितंयदि
तदाशतंवर्षाण्यायुःस्यात् लग्नाच्चंद्राच्चग्रहाः अष्टमस्थाः नस्युः शुक्रगुरूबलवंतौतदापूर्णायुःव्योमार्कवर्षायु

धीःकेंद्रायुर्नवस्थायदिखलखचरानोगुरोर्भेविलग्नेकेंद्रेकाव्येगुरौवाशुभमपिनिध
नंसौम्यदृष्टंशतंस्यात् ॥ लग्नादिंदोर्नखेटायदिनिधनगतावीर्यभाजौसितेज्यौपू
र्णायुःस्वीयराशौशुभगगनचराःषष्टिरंगोच्चगेब्जे ॥ ७ ॥ कोदंडांत्यार्धमंगंयदिस
कलखगाःस्वोच्चगाज्ञेजिनांशैर्गोस्थेपूर्णंचकेंद्रेसुरपतिभृगुजौलाभगेब्जेपरायुः ॥
शुक्रेमीनेतनुस्थेनिधनगृहगतेसौम्यदृष्टेसुधांशौजीवेकेंद्रेशतंस्यादथतनुगृहपे
छिद्रगेपुष्करेब्जे ॥ ८ ॥ ॥ छ ॥ ॥ छ ॥

स्यात् शुभग्रहाः स्वराशिस्थाःवृषेलग्नेवाचंद्रेसतिवर्षाणांशषष्टिरायुःस्यात् ॥ ७ ॥ कोदंडांत्यस्यार्धलग्नेधनु
र्लग्नद्वितीयहोरायांबुधेजिनांशैर्वृषस्थेअन्येसर्वेग्रहाः स्वोच्चगाःतदापूर्णमायुःस्यात् गुरुशुक्रौकेंद्रेसतिलाभगे

शुभग्रहनवांशस्थाः क्रूरः उपचयस्थाः त्रिषट्दशमायस्थाः कातरा भीरवः युद्धेपराजिताइतियावत् शुभग्र
हाः कंटकस्थाः केंद्रस्थाः तदाव्योमार्कसंख्यंविंशदधिकंशतंवर्षाणि आयुः परायुः स्यात् परायुर्योगेषुशनि
कुजौअष्टमस्थौचेत्तदानोपरायुः परायुर्नभवतीत्यर्थः लग्नेशगुरू केंद्रस्थौक्रूरास्त्रिकोणाष्टमकेंद्रवर्जिताश्चेत्तदा

क्रूराःसौम्यांशयाताउपचयगृहगाः कातराःकंटकस्थाः सौम्याव्योमार्कसंख्याय
दितनुपकुजौरंध्रगौनोपरायुः॥केंद्रेलग्नेशजीवोनवसुतनिधनेकंटकेनोखलाख्याः
संपूर्णपापखेटायदिगुरुजलगाजीवभावेचसौम्याः ॥ १० ॥ ॥ छ ॥

पूर्णायुःस्यात् क्रूरग्रहाःगुरुजलगाःनवमचतुर्थगाःशुभाः जीवनवांशस्थाः यद्वा समराशिनवांशस्थाःसंतःव्य
यधनगृहगाःशुभाः पूर्णश्चंद्रःलग्नस्थः इहयोगेजातानांशतंवर्षाण्यायुः कथंभूतंइंदिरामंदिरंसंपदासाहितमिति
अग्रिमश्लोकपूर्वार्धेनसंबंध ॥ १० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रेपरायुःपूर्णायुः शुक्रेमीनलग्नगेसौम्यग्रहदृष्टेचंद्रे अष्टमस्थेगुरौकेंद्रेसतिवर्षाणांशतमायुःस्यात् अथवा तनुगृहपेइत्यग्रिमश्लोकेनान्वयः ॥ ८ ॥ लग्नपेऽष्टमस्थेचंद्रेदशमस्थेगुरौबलवति अन्येग्रहाः नवमभवनगाःतदाशतायुः कर्के॰ग्नेचंद्रजीवौतृतीयषष्ठैकादशेशुभग्रहयुक्तौशुक्रबुधौचकेंद्रेयदितदापिशतायुः शतायु

वागीशेवीर्ययुक्तेनवमभवनगाःसर्वखेटाःशतायुःकर्कैंगेजीवचंद्रौसहजरिपुभवे
सत्कविज्ञौचकेंद्रे ॥ केंद्रेसूर्यारमंदागुरुनवलवगावाक्पतौलग्नयातेव्यष्टस्थानेषु
शेषाःशरगजतुलितंस्यान्नराणांतदायुः ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥

रितिदेहलीदीपकन्यायेनोभयत्रान्वेति रविभौमशनयः गुरुनवमांशस्थाःकेंद्रेस्युःलग्नस्थेगुरौशेषाः अष्टमरहितभावस्थाः तदानराणांशरगजतुलितंपंचाशीतिवर्षमितमायुःस्यात् ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥

जा०लं० कर्कलग्नेचंद्रभौमौकेंद्राणिअष्टमभवनंचग्रहरहितंयदितदारामाब्दंस्यादितिअग्रिमस्थेनान्वयः ॥ १२ ॥ टी०

॥ ३९ ॥ अष्टमेशेलग्नगतेअष्टमभवनंशुभग्रहरहितंखवेदाश्चत्वारिंशद्वर्षाण्यायुःस्यात् मकरस्थौशनिरवीतृतीयषष्ठगौअ

रामाब्दंस्याल्लयेशेवपुषिचनिधनंसौम्यहीनंखवेदालग्नेशोरंध्रयातोवपुषिनिधन
पःस्यान्नृणांबाणसंख्यं ॥ नक्रेतिग्मांशुमंदौसहजरिपुगतौकंटकेरंध्रनाथेपारावा
राब्धिसंख्यंतदनुशुभखगाःसच्छवर्क्षेत्रखाग्निः ॥ १३ ॥ क्रूरैर्दृष्टेंगनाथेयदिशु
भविहगावीर्यवंतःसुधांशौसंस्थेसौम्येगणेचेद्गुणमुनितुलितंरंध्रगैर्मध्यमायुः ॥
स्याच्चंद्रादन्हिपापैरथतपनसुतेद्व्यंगलग्नेहियातेरिःफेशेरंध्रनाथेयदिबलरहितेकं
कपत्राक्षिसंख्यं ॥ १४ ॥ ॥ छ ॥ ॥ छ ॥

ष्टमेशेकेंद्रगेपारावाराब्धिसंख्यंचतुश्चत्वारिंशद्वर्षाण्यायुःस्यात् तदनुशुभग्रहाः सच्छवर्क्षेशुभग्रहनवांशेराशौ
वाऽत्रत्रिंशद्वर्षाण्यायुःस्यात् ॥ १३ ॥ लग्नेशेक्रूरदृष्टेशुभग्रहाःबलिनःचंद्रेशुभवर्गगेकापिभावेस्थितेसतिगुण ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुभग्रहयुक्तेलग्नेशेलग्नेअन्यग्रहैर्नदृष्टेऽष्टमेशेऽष्टमगतेसतिवर्षाणांविंशतिरायुःस्यात् अष्टमेशेलग्नेशेचकेंद्रस्थे
बलरहितेचसतित्रिंशद्वर्षाण्यायुःस्यात् ॥ ११ ॥ चंद्रेआपोक्लिमस्थेतृतीयषष्ठनवमद्वादशगतेतत्पतौलग्नेशेआ

युग्मक्षोर्शंगतावाव्ययधनगृहगाश्चेच्छुभाःशीतभानुःसंपूर्णोलग्नयायीशतमिहजनि
नामिंदिरामांदिरंस्यात् ॥ लग्नेशेसौम्ययुक्तेवपुषिचलयपेरंध्रगेनान्यदृष्टेविंशत्केंद्रेल
येशेबलिवियुजितथालग्नपेत्रिंशदायुः ॥ ११ ॥ इंदावापोक्लिमस्थेतदनुतनुपतौनिर्ब
लेपापदृष्टेदंतैस्तुल्यंततोर्कःखलखगविवरेलग्नगोब्जत्रिसंख्यं ॥ रिःफेकेंद्रेसुरेज्येगुरु
रिपुसहजेस्यात्सपापेंगनाथेरामाब्दंकर्कलग्नेकुजतुहिनकरौकेंद्ररंध्रंग्रहोनां ॥ १२ ॥

पोक्लिमस्थेउभयेनिर्बलेक्रूरदृष्टेचसतिदंतैस्तुल्यंद्वात्रिंशद्वर्षाण्यायुःस्यात् क्रूरग्रहयोरंतरेलग्नगोर्कश्चेत्तदाऽब्ज
त्रिसंख्यंएकत्रिंशद्वर्षाण्यायुः गुरौद्वादशेकेंद्रेवासपापेलग्ननाथेनवमषष्ठतृतीयेसतिरामाब्दंत्रीणिवर्षाण्यायुः

मुनितुलितंत्रिसप्ततिवर्षतुल्यमायुःस्यात् चंद्रादष्टमगैःपापैःदिवाजन्मनिमध्यमायुःस्यात्अथशनौद्व्यंगेद्विस्व
भावसंज्ञकेलग्नेस्थितेद्वादशभावनाथे अष्टमनाथेचबलहीनेसतिकंकपत्राक्षिसंख्यंपंचविंशतिवर्षाण्यायुःस्यात्
॥ १४ ॥ सूर्येकर्कलग्नेक्रूरयुतेचंद्रेदशमगेगुरौकेंद्रस्थेशरविशिखमितंपंचपंचाशद्वर्षमितमायुःस्यात् बुधेदश

कर्केगेसप्तसप्तौखलविहगयुतेपुष्करस्थेद्विजेशेकेंद्रेयातेसुरेज्येशरविशिखमितं
पुष्करेनीरगेवा ॥ सौम्येपीयूषभानौव्ययनिधनगतेदेहगेवाकवीज्यावेकर्क्षेव्यो
मबाणैर्व्ययरिपुनिधनेलग्ननाथाढ्यचंद्रे ॥ १५ ॥ ॥ ७ ॥

मेचतुर्थगेवाचंद्रेव्ययेऽष्टमेलग्नेवाशुक्रगुरूएकराशिगौक्वापिस्थितौचेत्तदाव्योमबाणैः समंपंचाशद्वर्षमितमायुः
स्यात् लग्नेशयुक्तेचंद्रेद्वादशषष्ठाष्टमेलग्नेशेशन्यंशेशनिनवांशगेभुजगशरमितंअष्टपंचाशन्मितमायुःस्यादित्य
ग्रिमश्लोकेनान्वयः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जा०लं० शुभग्रहाः अष्टमव्यतिरिक्तभावस्थाः लग्नेशःपापयुक्तःत्रिकस्थस्तदाषष्टिवर्षाण्यायुःस्यात् सूर्यसहितश्चंद्रराशी टी०
॥ ४० ॥ शः लग्नेशश्चमृत्युगःगुरुर्केंद्रगोनचेत्षष्टिवर्षाण्यायुःस्यात्निजशत्रुभौमाभ्यांयुक्तःसूर्योलग्नेगुरौबलहीनेचंद्रे

शन्यंशेलग्ननाथेभुजगशरमितंस्यादथोसौम्यखेटारंध्रोनादेहनाथोव्ययरिपुनिधने
पापयुक्षष्टिरायुः ॥ राशीशोलग्ननाथोदिनमणिसहितोमृत्युगोवाक्पतिश्चेन्नोकेंद्रे
षष्टिरायुर्वपुषिदिनपतिःशत्रुभौमान्वितश्चेत् ॥ १६ ॥ वागीशेहीनवीर्येव्ययतनु
जगतेयामिनीशेखशैलाधर्मैसर्वैःपरायुःखलखगलवगैःकेंद्रयातैरशीतिः ॥ क्रूरैः
क्रूरर्क्षयातैः शुभभवनगतैःसौम्यखेटैःसवीर्यैर्लग्नेशेस्यात्परायुःसुतभवनगतैःषष्टि
रायुर्नराणां ॥ १७ ॥ ॥ छ ॥ ॥ छ ॥

व्ययपंचमस्थेखशैलाः सप्ततिवर्षाण्यायुःस्यादित्यग्रिमश्लोकेनान्वयः ॥ १६ ॥ सर्वैःग्रहैःक्रूरराशिस्थैः ॥ ४० ॥
शुभैःशुभगृहगतैः लग्नपतौसबलेपरायुःस्यात् सुतभवनगतैःसर्वैर्ग्रहैःनराणांषष्टिवर्षाण्यायुःस्यात् ॥ १७ ॥

धनुर्धरराश्यंत्यनवांशेलग्नगेशुभैः प्रथमनवांशस्थैःकेंद्रगैर्वर्षाणांशतमायुःस्यात् तृतीयचतुर्थाष्टमस्थैःसर्वैश्चिरा
युःस्यात् लग्नाच्चंद्राच्चअष्टमेशेव्ययकेंद्रस्थेअष्टाविंशतिवर्षाण्यायुःस्यात् केंद्रेशुभग्रहरहितेअष्टमस्थश्चेत्कश्चि

सारंगस्यात्यभागेयदिवपुषिगतेचाद्यभागेचकेंद्रे सौम्यैःखेटैःशतंस्याद्वसुसहजसु
खेस्याच्चिरायुःसमस्तैः ॥ लग्नात्प्रालेयभानोर्निधनमधनपेरिःफकेंद्रेष्टविंशत्केंद्रेसौ
म्यग्रहोनेयदिमृतिभवनेकश्चिदास्तेखरामाः ॥ १८ ॥ क्षीणेप्रालेयभानौयदिखलख
चरौमृत्युगोमृत्युनाथःकेंद्रस्थोलग्ननाथोनिजबलरहितःखाश्वितुल्यंतदायुः ॥ सौ
म्यैरापोक्लिमस्थैर्दिनमणिजाविधूवैरिरंध्रालयस्थौतुल्यंकामांकुशैःस्यादथधनमृति
गौरिःफगौपापखेटौ ॥ १९ ॥ ॥ छ ॥ ॥ छ ॥

द्ग्रहस्तदाखरामास्त्रिंशद्वर्षाण्यायुःस्यात् ॥ १८ ॥ चंद्रेक्षीणेसतिक्रूरग्रहोऽष्टमस्थःमृत्युभावेशःकेंद्रस्थःलग्ने
शोनिर्बलस्तदाखाश्वितुल्यंविंशतिवर्षाण्यायुःस्यात् शुभग्रहैःआपोक्लिमगतैः शनिचंद्रौषष्ठाष्टमस्थौतदाकाम।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुशैर्नखैस्तुल्यंविंशतिवर्षाण्यायुःस्यात् अथेत्यग्रिमश्लोकेनान्वयः ॥ १९ ॥ अथराहुचंद्ररहितौक्रूरग्रहौद्वितीया
ष्टद्वादशगौतदाव्योमनेत्रप्रमाणंविंशतिसंख्यमायुः सूर्यशनीकेंद्रगौकुजोलग्नगस्तदापुष्पबाणांकुशंविंशद्वर्षा
ण्यायुःस्यात् शुक्रगुरूलग्नस्थौभौमपापौपंचमस्थौतदाअनायुः अल्पायुःस्यात् कर्कयुक्तोलग्नेशः जन्मराशि

हीनौस्वर्भानुनावायदिहिममहसाव्योमनेत्रप्रमाणंकेंद्रस्थौसूर्यमंदौयदिवपुषिकुजः
पुष्पबाणांकुशंस्यात् ॥ शुक्रेज्यावंगयातौतनयभवनगौभौमपापावनायुर्जन्मेशः
सार्कलग्नेखलशुभसहितश्चेक्षितःस्यादनायुः ॥ २० ॥ यत्संप्रोक्तंयोगजंपूर्वमा
युर्होरापारावारपारंगमज्ञैः ॥ तस्मादायुःसारभूतंयदेतत्पुण्याचारश्लोकभाजांन
राणां ॥ २१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

संस्थितःअन्यैर्युतःदृष्टश्चेत्तदाऽनायुःअल्पायुःस्यात् ॥ २० ॥ जातकशास्त्रसमुद्रोत्तीर्णैः समस्तजातकशास्त्र
ज्ञादिभिरित्यर्थः पूर्वंयद्योगजमायुःप्रोक्तं प्रणीतंतस्मात्पूर्वोक्तात्सारभूतंदृढांशभूतं आयुर्यदेतदुक्तंतत्पुण्याचा

रश्लोकभाजांसदाचारोपलक्षितधर्मयशोयुक्तानांनराणांघटतइत्यध्याहारः ॥ २१ ॥ अथादेशविधिरनुष्टुब्वृत्तेना
हबलाबलविवेकेनेति पुष्करालयशालिनांसूर्यादिग्रहाणांबलाबलविचारेणसुमनोभिरिहमायुःकथनीयं धर्मा

बलाबलविवेकेनपुष्करालयशालिनां ॥ सुमनोभिरिदंदेश्यमायुर्धर्मादिशालिनां
॥२२॥ हृद्यैःपद्यैर्गुंफितेसूरितोषेलंकाराख्येजातकेमंजुलेस्मिन् ॥ आयुर्दायःश्री
गणेशेनवर्यैर्वृत्तैर्युक्तोबाहुपक्षैःप्रणीतः ॥ २३ ॥ इतिश्रीजातकालंकारेपंचमोऽ
ध्यायः ॥ ५ ॥ लग्नाधीशेर्थगेचेद्धनभवनपतौलग्नयातेर्थवान्स्याद्बुद्ध्याचारप्र
वीणः परमसुकृतकृत्सारभृद्भोगशीलः ॥ भ्रातृस्थानेंगनाथेसहजभवनपेलग्न
यातेल्पशक्तिः सद्बंधूराजपूज्यःकुलजनसुखदोमातृपक्षेणयुक्तः ॥ १ ॥

दिशालिनांभवति पापकर्मिणांनभवतीति अर्थात्सिद्धं ॥ २२ ॥ अध्यायंसमापयति हृद्यैःपद्यैरिति ॥ २३ ॥ इतिश्री
जातकालंकारटीकायांपंचमोऽध्यायः ॥ ५ ॥ अथलग्नेशधनेशादीनांव्यत्ययात्फलान्याह लग्नेशेधनगेधनेशेलग्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेसतिजातोधनवान्बुद्ध्याचारप्रवीणःबुद्ध्याचारेणचनिपुणःउत्कृष्टपुण्यकृत्बलवान्भोगैकशीलश्चस्यात्ल
ग्नेशेसहजेसहजेशेलग्नस्थेअल्पवीर्यः प्रशस्तबंधुयुक्तःकुलजातानांसुखदः मातृपक्षेणसहितश्चस्यात् ॥ १ ॥
चतुर्थेलग्नेशेलग्नगेचतुर्थेशेजातः क्षमायुक्तः ताताज्ञाराजकार्यप्रगुणमतियुक्तः पितुराज्ञायांराजकार्येचऋजु

तुर्येशेलग्नयातेतदनुतनुपतौतुर्यगेस्यात्क्षमावान्‌ताताज्ञाराजकार्यप्रगुणमतियु
तःसद्गुरुःस्वीयपक्षः ॥ लग्नस्थेसूनुनाथेतनुजपदगतेलग्ननाथेमनस्वीविद्यालंका
रयुक्तोनिजकुलविदितोज्ञानवान्मानसक्तः ॥ २ ॥ ॥ छ ॥

मतिःसन्प्रशस्तोगुरुर्यस्ययद्वासतोगुरुः स्वकीयपक्षेचस्थितःस्यात् पंचमेशेलग्नेलग्नेशेपंचमस्थेसतिनरःप्रश ॥ ४२ ॥
स्तमनाःविद्ययाभूषितःस्वकुलेविख्यातोज्ञानवान्सदसद्वस्तुज्ञःमानेअभिमानेसक्तः ॥ २ ॥

षष्ठेशेलग्नगेतदनुलग्नेशेषष्ठगेसतिनित्यंरोगरहितः अतएवशरीरेबलवान्द्रोहादौसक्तःआदिशब्देनपरानिष्ट
करणादिज्ञेयं संग्रहपरःअतोद्रव्यवान्स्यात् लग्नेशेसप्तमस्थेसप्तमेशेलग्नस्थेसतितदामनुजःपितृभक्तःस्त्रीविष

षष्ठेशेलग्नयातेतदनुतनुपतौषष्ठगेव्याधिहीनोनित्यंद्रोहादिसक्तोवपुषिसबलवा
न्द्रव्यवान्संग्रहीस्यात् ॥ मूर्तीशेकामयातेमदनसदनपेमूर्तिगेतातसेवीलोल
स्त्वांतोंगनायांभवतिहिमनुजःसेवकःशालकस्य ॥ ३ ॥ अंगेशेरंध्रयातेनिधन
गृहपतावंगगेद्यूतबुद्धिःशूरश्चौर्यादिसक्तोनिधनपदमियाद्भूपतेर्लोकतोवा ॥ देहा
धीशेशुभस्थेशुभभवनपतौदेहसंस्थेविदेशीधर्मासक्तोनितांतंसुरगुरुभजनेतत्प
रोराजमान्यः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥

येचंचलमनाःशालकस्यभार्याभ्रातुःकार्यकरःस्यात् ॥ ३ ॥ लग्नेशेऽष्टमगेऽष्टमेशेलग्नगेद्यूतव्यवहारेनिपुणः
विक्रमवान्चौर्यादिसहितःआदिशब्देनवंचनासुनिपुणः राजतोलोकतोवानिधनपदंमरणमाप्नुयात् लग्नेशेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमस्थेनवमेशेलग्नस्थेसतिविदेशवासीनितांतंधर्मेरतः देवाराधनेगुरुसेवायांचतत्परः राजसत्कारभाजनंस्यात्
॥ ४ ॥ लग्नेशेकर्मस्थेकर्मनाथेलग्नगेभूपालः लाभेनतद्वत्सुरूपेणचविख्यातः गुरुसेवायांप्रीतिमान् लोलुपः

कर्मस्थेलग्ननाथेगगनभवनपेलग्नगेभूपतिःस्यात्ख्यातोलाभेचरूपेगुरुभजनर
तोलोलुपोद्रव्यनाथः ॥ लाभेशेलग्नयातेतनुभवनपतौलाभसंस्थेसुकर्मादीर्घायुः
क्षोणिनाथःशुभविभवयुतःकोविदोमानवःस्यात् ॥ ५ ॥ लग्नेशेरिःफयातेव्य
यसदनपतौलग्नगेसर्वशत्रुर्बुद्ध्याहीनोनितांतंकृपणतरमतिर्द्रव्यनाशीविलोलः
॥ इत्थंतातादिकानामपिजनुषितथाखेचरणांहियोगाद्वाच्यंहोरागमज्ञैस्तदनुत
नुपयुग्भार्गवेराजपूज्यः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥

चंचलचित्तः द्रव्याणांस्वामीचस्यात् लाभेशेलग्नस्थेलग्नेशेलाभस्थेशोभनकर्मादीर्घायुः क्षोणीनाथोराजाशुभ ॥ ४३ ॥
विभवयुतः कोविदोधीरश्चमानवःस्यात् ॥ ५ ॥ लग्नेशेरिःफयातेव्ययनाथेलग्नगेसतिसर्वशत्रुः सर्वेषांजना

नांसर्वेशत्रवोयस्येतिवायस्येतिवायतोनिरंतरं बुद्ध्याहीनः बुद्धिरहितः कृपणतरमतिः अतिशयवित्तहीनबु
द्धिः अतश्चद्रव्यनाशीविलोलः निर्विचारीशीघ्रकारीचस्यात् इत्थमुक्तप्रकारेणजातकजन्मसमयेतातादिका
नामपिखेचराणांयोगात्फलंहोरागमज्ञैर्वक्तव्यं अयमर्थः जातकस्यजन्मलग्नाद्दशमंभवनंतातगृहंतदेवलग्नंप्र
कल्प्यतदग्रिमान्क्रमेणधनादिभावान्परिकल्प्यतत्रलग्नभावेशयोर्व्यत्ययस्थितिमवलोक्यलग्नाधीशेर्थगेचेद्धन

एवंस्वमत्यासुफलप्रबोधंश्रीजातकालंकरणंमनोज्ञं ॥ वृत्तैरनंतेशमितैर्निबद्धंम
यामुदेदैववविदामुदारं ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥

भवनपतौ लग्नयातेर्थवान्स्यादित्यादिना उक्तोदाहरणेनतातादीनांअर्थवत्त्वादिफलंहोराशास्त्रज्ञैर्वाच्यम् अथ
मंगलायशुभफले आदेशंसमापयति तदनुतनुपयुक्भार्गवेलग्नेशयुक्तेशुक्रेत्रिकव्यतिरिक्तभावगइतिशेषात्तत्र
जातोराजपूज्योभवति राजपूज्यशब्देनवांछितपदार्थानांसौलभ्यंध्वन्यते ॥ ६ ॥ एवमुक्तप्रकारेणमयागणेशेन
स्वबुद्ध्याउदारंसारनिरूपणंमनोज्ञंपदपदार्थरुचिरंसुफलप्रबोधंस्फुटफलजनकंदैवज्ञानांप्रमोदायअनंतेशमितै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देशाधिकशतप्रमितैर्वृत्तैः श्रीजातकालंकरणंनिबद्धंविरचितं ॥ ७ ॥ अथस्वरचितग्रंथस्यकविमनोरुचिरत्वं प्रार्थ्यतेमेममजातकोक्तिः भवतांपूज्यानांकवीनांअतिसरलेमानसेनिर्मलामरालाहंसीवविहरतांकथंभूताजात कोक्तिः पुष्करालयवशापुष्करमाकाशस्तदेवालयंयेषांतेपुष्करालयाःग्रहाःतेषांवशाधीनाशुभाशुभसूचकग्रहो

पुष्करालयवशागुणसाराजातकोक्तिरमलेवमराला ॥ संस्कृताविहरतांभवतांमे मानसेऽतिसरलेसुकवीनां ॥ ८ ॥ ॥ छ ॥ ॥छ॥

पयोज्याइत्यर्थः हंसीपक्षेपुष्करंजलंतस्यालयोमानसं तद्वशातद्वर्तिनीत्यर्थःगुणसाराजातकगुणानांसारोपदेशो र्थोयस्यांसा हंसीजलेगुणसाराहितगुणादैर्ध्ययुक्ता राजहंसास्तुतेचंचुचरणैर्लोहितैःसिताइतिअभिधानात् अम लाशुद्धादोषरहिताइत्यर्थः पक्षेऽमलानिर्मलेत्यर्थः संस्कृतामनोज्ञादिवाक्यपरिष्कृताहंसीपक्षेनिसर्गरुचिराइ

त्यर्थः ॥ ८ ॥ अथशालिन्याअध्यायंसमापयति हृद्यैःपद्यैरितिस्पष्टार्थः ॥ ९ ॥ इतिजातकालंकारेटीकायां षष्ठोऽध्यायः ॥ ६ ॥ अथविशिष्टंस्ववंशंसंख्यापयन्ग्रंथसमाप्तौदेशकालविशेषंप्रख्यापयति त्रिभिःपृथ्वीशार्दू लविक्रीडितैर्वृत्तैः अवनिमंडलेभारद्वाजकुलेनाम्नाकान्हजीकोविदः पंडितःअभूत्सकीदृशः जगतिलोकेमंड

हृद्यैःपद्यैर्गुंफितेसूरितोषेलंकाराख्येजातकेमंजुलेस्मिन् ॥ भावाध्यायःश्रीगणेशेनव यैर्वृत्तैर्युक्तोऽष्टाभिरेषप्रणीतः ॥ ९ ॥ इतिजातकालंकारेषष्ठोऽध्यायः ॥ ६ ॥ अभू दवनिमंडलेगणकमंडलाखंडलःश्रुतिस्मृतिविहारभूर्विबुधमंडलीमंडनं ॥ प्रचंडगु णगुर्जराधिपसभाप्रभातप्रभाकर्वींद्रकुलभूषणंजगतिकान्हजीकोविदः ॥ १ ॥

लज्योतिर्विद्देवाचार्यःस्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराःसिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थगोचराइत्यभिधाना त् श्रुतिस्मृतिविहारभूः प्रत्यहंश्रुतिस्मृतिप्रतिपादनद्वारातासांविहारभूमिः विबुधमंडलीमंडनंपंडितशोभादाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कइत्यर्थः प्रचंडगुणगुर्जराधिपसभाप्रभातप्रभाप्रचंडो रिपुविजयशालिनोगुणाः संधिविग्रहादयोयस्यसगुर्जराधिपः गुर्जरदेशाधिपः तस्यसभायाः प्रभातप्रभेवप्रभाप्रकाशकइत्यर्थः कवींद्रकुलभूषणंकविश्रेष्ठसंदोहस्यप्रभावहम् ॥ १ ॥ तस्मात्कान्हजीकोविदात्परमंउत्कृष्टंसुतानांत्रयंबभूवतेषुज्यायान् ज्येष्ठः ग्रहज्ञतिलकः गण

भारद्वाजकुलेबभूवपरमंतस्मात्सुतानांत्रयंज्यायांस्तेष्वभवद्ग्रहज्ञतिलकः श्रीसूर्यदासःसुधी ॥ श्रीमान्सर्वकलानिधिस्तदनुजोगोपालनामाभवच्छीमद्दैववित्दावरस्तदनुजः श्रीरामकृष्णोभवत् ॥ २ ॥ ॥ छ ॥ ॥ छ ॥

कश्रेष्ठःसुधीः श्रीसूर्यदासः अभवत्तदनुजः ततःपश्चाज्जातः श्रीमान्वेदवित्सर्वकलानिधिः सर्वकलाकुशलः गोपालनामा अभवत् तदनुजःश्रीमतांदैवज्ञानांचश्रेष्ठः श्रीरामकृष्णोभवत् ॥ २ ॥ ॥ छ ॥

तत्रगोपालसूनुःगणेशः मार्गणरामसायकधरासंख्येशाकेपंचत्रिंशदधिकपंचदशमितेशाकेनभस्येभाद्रपदमासेब्रह्मपुरेसूर्यपुरेइदंसुजातकंशोभनंजातकंश्रीशिवाख्यविदः प्रमोदायचक्रेकृतवान् कथंभूतोगणेशः शिवाध्यापकःशिवोअध्यापक उपाध्यायोयस्यछंदोलंकृत्यादिवित् छंदांसिमात्रावर्णभेदभिन्नावृत्तानिअलंकृतयः

शाकेमार्गणरामसायकधरा १५३५ संख्येनभस्येतथामासेब्रह्मपुरेसुजातकमिदंचक्रेगणेशःसुधीः ॥ छंदोलंकृतिकाव्यनाटककलाभिज्ञः शिवाध्यापकस्तत्र श्रीशिवविन्मुदेगणितभूर्गोपालसूनुःस्वयं ॥ ३ ॥ येपठिष्यंतिदैवज्ञास्तेषामायुःसुखेशिवम् ॥ भूयात्कैरवकुंदाभासुकीर्तिःसर्वतोदिशम् ॥ ४ ॥ ॥ छ ॥

उपमाद्यलंकाराः काव्यानिगद्यादिभेदेनद्विविधानिनाटकानिसंस्कृतप्राकृतभाषानिबद्धानिकलाश्चित्रकर्माद्याः गणितभूर्गणिताश्रयः सिद्धांतविदित्यर्थः ॥ ३ ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायंपूरयति हृद्यैःपद्यैरितिस्पष्टार्थः ॥ ५ ॥ श्रीमच्छुक्ककुलेमहीयसियशःशुक्लीकृतेजातके आसीत्कृष्णदयाभरप्रमुदितःकृष्णोजयाद्यःकृती ॥ तत्पुत्रेणविभावितातिरुचिराख्यातकालंकृतिश्रीरेषाहरभानुनामतिमतांमोदायभूयाच्चिरम् ॥ १ ॥ इतिश्रीमच्छुक्लोपनामकहरभानुभाविताजातकालंकारटीकासमाप्ता ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ छ ॥ ॥ छ ॥

हृद्यैःपद्यैर्गुंफितेसूरितोषेलंकाराख्येजातकेमंजुलेस्मिन् ॥ वंशाऽध्यायःश्रीगणेशेनवृत्तैर्युक्तोवेदैःशैलसंख्यःप्रणीतः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥

इतिश्रीगणेशेनविरचितजातकालंकारेसप्तमोऽध्यायःसमाप्तः ॥ ७ ॥

इदं पुस्तकं पंडित शिवलालात्मजश्रीधरेण मोहमय्यां स्वकीये 'ज्ञानसागरमुद्रालये' धात्वक्षरैर्मुद्रितम् । शकाब्दाः १८१३ ख्रिस्ताब्दाः १८९१ ।

जाहिरात.

सर्व विद्वज्जन ज्योतिर्विदोंको जाहिर करनेमे आता है कि–श्रीमद्बृहत्पाराशरीहोरा ज्योतिषकाग्रंथ अति उत्तम भाषाटीकासह है इस ग्रंथके पूर्व और उत्तर ऐसे दो भाग हैं और इन दोनो भागोंके अध्याय ७१ हैं तिसमें पूर्वभागके अध्याय ५१ हैं. पहले अध्यायमें शास्त्रोत्पत्ति, दूसरे अध्यायमें सूर्यादि ग्रहोंका प्रादुर्भाव, तिसरे अध्यायमें राशीका स्वभाव, चौथेमें दृष्टीका वर्णन, पांचवेमें गर्भाधाननिर्णय, छट्टेमें सूतिका विधान, सातवेमें अरिष्टयोग, आठवेमें पुत्र माता पीता विचार, नववेमें मातुलादिकका विचार, दशवेमें योगभग विचार, ग्यारवेमें धूमादिग्रह विचार, बारवे अध्यायसे लेके तेईस अध्यायतक् मिश्रफल, पंचांगफल, कारकादि ग्रहफल, द्वादश भावफल, द्विग्रहादि योगफल, अष्टवर्ग वर्णन, नभसादि योगफल, इत्यादि विषय हैं. और आगेके अध्या-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमें राजयोग, अवस्था विचार, अंतर्दशा विचार और योगादिक इत्ते विषय पूर्वभागमें हैं, और उत्तर भागके पहले अध्यायमें अष्टवर्ग विचार, २ भावबल दृष्टिबल विचार, ३ इष्ट कष्ट विचार ४ रश्मीकी संभूती, ५ लोकोंका सुखदुःख, ६।७।८।९ लोकयात्रा, १० दाय विचार, ११ अंतरदाय विचार, १२ दाय विषय, १३ भाग्य विचार कलांशादि षोडशांदिफल, १४ वर्षचर्या, १५ वर्षचर्या फल, १६ मासचर्या, १७ दिनचर्या, १८ प्रश्नविद्या, १९ ग्रंथानुक्रमणिका, २० शास्त्रफलादेश, इत्यादिक विषयोंसे युक्त ऐसा यह अपूर्व ग्रंथ जोकी, एकही पुस्तक पास रखनेसे जोतिषीयोंकों वर्षफल जन्मपत्रिका बनानेमें परम सहायता करनेवाला है. और लोगोंके हितार्थ किंमतभी अति स्वल्प रखी है. केवल रुपिया पांच (५) टपालखर्च आठ (८) आना भेज देनेसे ऐसे अपूर्व ग्रंथका लाभ होगा. **वसंतराजशाकुन** छपके तैयार है इस ग्रंथमें शकुन विषयक विचार बहुत ही उत्तम हैं किंमत रुपया (३॥) टपालखर्च छः आना.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति जातकालंकारः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=01.08.19 11:03
,TRANSFERRED=2019/08/01 at 11:17:11
,PAGES=27
,TYPE=STD
,NAME=S0001212
,Book Name=M-11-JATKALANKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection